कंसीयपरशव्ययोः लुग् भवति । कंसीयस्य विकारः [1]कांस्यः । परशव्यस्य विकारः पारशवः । प्रातिपदिकाधिकाराद् धातुप्रत्ययस्य न लुग् भवति । परशव्यशब्दादनुदात्तादित्वादेव अञि सिद्धे लुगर्थं वचनम् । ननु च 'यस्येति च' (६.४. १४८/३११) इति लोपे कृते 'हलस्तद्धितस्य' (६.४. १५०/४७२) इति [2]यलोपो भविष्यति ? नैतदस्ति, [3]ईतीति तत्र [4]वर्तते ॥

इति [5]श्रीजयादित्यविरचितायां काशिकायां वृत्तौ

चतुर्थाध्यायस्य तृतीयः पादः ॥

---o---

1. कांस्यम् ब. 2. लोपो फ. 3. इतीति क. ब. 4. अनुवर्तते ह. 5. श्रीजयादित्यविरचितायां नास्ति ब. क.